# Vighnaraja Stuti by Devarshi

# વિઘ્નરાજસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

## Document Information

Text title : Vighnaraja Stuti by Devarshi

File name : vighnarAjastutiHdevarShibhiHproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 7, Adhyaya 9

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Vighnaraja Stuti by Devarshi

# વિઘ્નરાજસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

કશ્યપ ઉવાચ -

મમાસુરં શાન્તિયુતં વીક્ષ્ય દેવાઃ સુહર્ષિતાઃ ।
પ્રણમ્ય મુનિસંયુક્તાઃ પુપૂજુર્વિઘ્નનાયકમ્ ॥ ૧॥

પૂજ્યં તં હૃષ્ટરોમાણઃ પુનઃ પ્રણમ્ય ભાવતઃ ।
તુષ્ટુવુર્વિઘ્નરાજં તે બધાઅજલય આદરાત્ ॥ ૨॥

દેવર્ષય ઊચુઃ

સામ્યસ્વરૂપં દ્વિવિધેષુ સંસ્થં દ્વન્દ્વૈર્વિહીનં પરમાર્થભૂતમ્ ।
આનન્દનાથં નિજભક્તપોષં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૩॥

સર્વાત્મકં બિમ્બં અથો વિધાય તેનૈવ દ્વન્દ્વં રચિતં ગણેશ ! ।
સત્યસ્વરૂપં ચ પરં હ્યસત્યં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૮॥

ભેદૈર્વિહીનં પરં અપ્રમેયં સાક્ષિમયં કૃત્ય વિનાયકત્વમ્ ।
તત્રૈવ નિત્યં સમભાવસંસ્થસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૫॥

દુણ્ઢે! ત્વયા ભેદયુતં દ્વિતીયં સૃષ્ટં પરં બ્રહ્મ વિહારદં ચ ।
ઉત્થાનરૂપં ત્વં અપિ પ્રસંસ્થસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૬॥

ત્વન્માયયા મોહયુતે પરેશે અન્યોન્યં આદૌ મિલિતે પ્રકાશિન્! ।
તત્ર સ્થિતસ્ત્વં ચ વિમોહશૂન્યસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૭॥

ત્વત્પ્રેરિતં દ્વન્દ્વમયં પરં ચ સોઽહં તથા બિન્દુમયં ચકાર ।
તત્સ્થઃ સમત્વેન વિહારકારિંસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૮॥

તાભ્યાં મિલિત્વા રચિતં ગણેશ! વિશ્વં ચતુષ્પાદમયં પુરાણમ્ ।
તત્રૈવ તે નાથ! પ્રકાશભાવસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૯॥

એવં સ્વતોત્થાનબલેન કૃત્વા સામ્યસ્વરૂપેણ વિહારકારિણ્! ।
તદ્ભાવશૂન્યોઽસિ જગાનન! ત્વં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૦॥

એવં પરેશાધિપતેન સૃષ્ટં ત્વં તાદૃશો નો ગણરાજ! ભાસિ ।
સાઙ્ક્યસ્વરૂપં પ્રવદન્તિ વેદાસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૧॥

દોષૈર્વિહીનં પ્રવદન્તિ સાઙ્ખ્યં તસ્માન્ન વિઘ્નેશ્વર ! સાઙ્ક્યસંસ્થઃ ।
ઉત્થાનહીનો ન ભવેઃ કદાપિ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૨॥

સ્વાનન્દવાસી ગણનાયકસ્ત્વં આનન્દરૂપોઽસિ વદન્તિ વેદાઃ ।
દ્વન્દ્વપ્રકાશશ્ચ તદાત્મશૂન્યઃ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૩॥

નિત્યં મનોવાક્પ્રભવૈશ્ચ હીનઃ સામ્યાત્મકેનૈવ સુયોગકેન ।
લક્ષ્યઃ સદાનન્દઘનપ્રકાશતં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૪॥

સ્તોતું ન શક્તાઃ પ્રભવન્તિ વેદા હેરમ્બં આદ્યં પ્રણમામહે ત્વામ્ ।
તેનૈવ તુષ્ટો ભવ દેવદેવ! તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૫॥

સર્વાત્મકં ત્વાં પ્રવદન્તિ સર્વે યોગીન્દ્ર મુખ્યાઃ પ્રભુદાસભૂતાઃ ।
તત્રૈવ તે ધ્યાનં અપારં એવં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૬॥

તેષાં મનોભક્તિભવં ચ ભાવં સંરક્ષણાર્થં વપુષા પ્રયુક્તઃ ।
તત્રૈવ ભક્તિં કુરુતે સુભક્તસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૭॥

દેહસ્ત્રસદ્બ્રહ્મમયશ્ચ તેઽયં સદ્રૂપતુણ્ડં ગજવાચકં તે ।
યોગે તયોસ્ત્વં ચ વિભાસિ દેવસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૮॥

કર્યાનનં ત્વાં પ્રવદન્તિ તેન સન્તહ્ સદા યોગમયં હૃદિસ્થમ્ ।
સિદ્ધિપ્રદં બુદ્ધિપ્રચાલકં વૈ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૯॥

બ્રહ્માઽહં એવં મદધીનકં ચ વિશ્વાદિકં બ્રહ્મગણા વદન્તિ ।
ત્વન્માયયા મોહિતચેતસસ્તે તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૦॥

સત્તાવિહીનાન્ પ્રકરોષિ તાંસ્ત્વં વિઘ્નપ્રદાનેન મહાનુભાવ ! ।
સ્વાર્થૈર્વિહીનાઃ પ્રભવન્તિ પૂર્ણાસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૧॥

અઙ્ગિં પુનસ્તે શરણાશ્રિતાસ્તે વિઘ્નેન હીનાઃ પ્રભવો ભવન્તિ ।
વિઘ્નેશનામાઽસિ તતસ્ત્વં એવ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૨॥

એતાદૃશં વિઘ્નપતિં કથં વૈ સ્તોતું વયં યોગમયં ભવામઃ ।
વેદા ન શક્તા મનસા હ્યલભ્યં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૩॥

વિઘ્નેશ ઉવાચ -
ભવત્કૃતં ઇદં સ્તોત્રં ભવેત્ સર્વાર્થદાયકમ્ ।

યઃ પઠેચ્છૃણુયાદ્વાઽપિ સ સર્વં પ્રાપ્નુયાત્ પરમ્ ॥ ૨૬॥

વિદ્યામાયુર્ધનં ધાન્યં યશો ધર્મં તથાર્થકમ્ ।
કામં મોક્ષં બ્રહ્મભૂયં દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૨૭॥

પુત્રપૌત્રાદિકં સૌખ્યમારોગ્યાદિસમન્વિતમ્ ।
વિજયં જયકાલે ચ સ્તોત્રપાઠાલ્લભેન્નરઃ ॥ ૨૮॥

મારણોચ્ચાટનાયં ચાનેન સિધ્દં ભવિષ્યતિ ।
પરકત્યપ્રશમનં ભવેચ્ચ મરણાદિકમ્ ॥ ૨૦॥

કારાગૃહાદિજા પીડા નશ્યેદનેન નિશ્ચિતમ્ ।
સહસ્રાવર્તનાદ્દેવા મુનયો નાઽત્ર સંશયઃ ॥ ૩૦॥

એકવિંશતિવારં ચૈકવિંશતિ દિનાનિ ચ ।
પઠેદ્વા શ ૃણુયાત્ સોઽપિ મનસીપ્સિતમાપ્નુયાત્ ॥ ૩૧॥

મદ્ભક્તિવર્ધનં ચેદં ભવિષ્યતિ નિરન્તરમ્ ।
અપરાધાદિકસ્યાઽપિ નાશકં ચાસ્તુ સર્વદા ॥ ૩૨॥

ઇતિ દેવર્ષિભિર્પ્રોક્તા વિઘ્નરાજસ્તુતિઃ સમાપ્તા । ૭.૯

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

*Vighnaraja Stuti by Devarshi*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*